# मधुमेह:

आयुर्वेदे वर्णितेषु विंशतिप्रकारेषु प्रमेहरोगेषु मधुमेह अन्यतम:। मधुमेह: शरीरस्य एतादृशी एका अवस्था यस्यां शरीरे इन्सुलिननामकस्य हार्मोनइत्यस्य परिमाणस्य कार्यक्षमतायाः वा न्यूनता भवति यस्मात् शरीरस्य कतिपयविशेषखाद्यपदार्थानां सम्यक्तया संसाधनं न भवति। यदा इन्सुलिनइत्यस्य नि:सरणे अवरोधो जायते तदा मधुमेहरोगस्य प्राकट्यं भवति।

अस्माभि: भुक्तानां पदार्थानां पाचनं भूत्वा रक्तसञ्चारमाध्यमेन अनेकेषु स्वावयवेषु प्राप्नोति। भुक्तेषु पदार्थेषु ~~पदार्थानां पाचनं भूत्वा~~ स्थित: कार्बोहाइड्रेट्इत्येषु पदार्थ: पाचनानन्तरं शर्करायां परिवर्त्तितो भवति य: ग्लुकोजइत्युच्यते। ग्लुकोजइत्ययं पदार्थ: शरीरस्य नैकेषु अवयवेषु शक्तिप्रदानं करोति। इन्सुलिनइत्ययं ग्लुकोजइत्येतं कोशिकाषु प्रवेशाय साहाय्यं करोति। तथा अतिरिक्ततया स्थितं ग्लुकोजइत्येतं यकृते ग्लाइकोजिनरूपेण स्थापयित्वा प्रयोजनम् आपतिते पुन: ग्लुकोजइत्येतस्मिन् परिवर्त्तयति। अनेन रूपेण इन्सुलिनइत्ययं रक्ते सञ्चारितं ग्लुकोजइत्यस्य स्तरं नियन्त्रयति। अत: यदा इन्सुलिनइत्यस्य परिमाणे कार्यक्षमतायां वा न्यूनता समागच्छति तदा रक्ते ग्लुकोज्इत्यस्य परिमाणस्य वृद्धि: सम्भूय रक्तस्य क्षारधर्मं नाशयति यस्मात् रक्तस्य रोगप्रतिरोधकक्षमतायाः ह्रासो भवति।

Scanned with CamScanner

अतः अधिकतया गृहीतं कार्बोहाइड्रेट् इत्येतं पदार्थं मधुमेहरोगस्य कारणत्वेन गृह्यते। तदुपरि पैतृकपरम्परा-मानसिकोद्वेग-गर्भावस्था-इत्यादयोऽपि अस्य रोगस्य कारणत्वेन ग्रहीतुं शक्यन्ते। तदुपरि अत्यधिकतया कृतेन मैथुनेनापि मधुमेहं जनयति।

मधुमेहरोगस्य विशिष्टं लक्षणत्रयमुपलभ्यन्ते। यथा- (१.) पिपासाधिक्यम् (२.) बुभुक्षाधिक्यम् तथा (३.) बारम्बारं मूत्रागमनम्। तदुपरि त्वचायां शुष्कता रूक्षता च, पेशीषु कृशता निर्बलता च, अङ्गेषु पीडा, गमनागमने अशक्तेरनुभूतिः, हस्तपादेषु शीतलता उष्णता वा, रात्रौ मूत्राधिक्यम्, शारीरिक-कृशता तथा उच्चरक्तचापभूते सत्यपि मधुमेहरोगस्य सन्देहः कर्त्तव्यः।

मधुमेहरोगस्य मुख्यतया प्रकारद्वयं प्राप्यते। यथा- (१.) उदकमेहः (Diabetes insipidus) (२.) मधुमेहः (Diabetes melitus)

साम्प्रतिककालेऽपि मधुमेहरोगस्य निर्मूलीकरणाय न कस्यापि विशेषौषधस्य आविष्करणाय समर्थाः वैज्ञानिकाः। केवलं अस्य रोगस्य नियन्त्रणाय इन्सुलिन् इत्ययमेव आविष्कृतोऽस्ति।

Scanned with CamScanner

**आसन** :- योगचिकित्सया अपि एतस्य रोगस्य चिकित्सां कर्तुं शक्यते। रोगेऽस्मिन् लाभदायकानि आसनानि यथा — जानुशिरासनम्, पश्चिमोत्तानासनम्, शीर्षासनम्, शशांकासनम्, अर्धमत्स्येन्द्रासनम्, मयूरासनम्, मण्डूकासनम्, उत्तानपादासनम्, हलासनम्, गर्भासनम्, भुजङ्गासनम्, पवनमुक्तासनम्, नौकासनम्, धनुरासनम्, गुप्तासनम्, गोमुखासनम्, सूर्यनमस्कारः, सिद्धासनम्, भूनमनासनम्, मत्स्यासनम् इत्यादीनि।

**प्राणायाम**: — मधुमेहरोगे लाभदायकाः प्राणायामाः यथा — बाह्यप्राणायामः, भस्त्रिकाप्राणायामः, मूर्च्छा-कुम्भक-प्राणायामः इत्यादयः।

**मुद्रा** :— रोगेऽस्मिन् लाभदायिकाः मुद्रा यथा - अपानमुद्रा, महामुद्रा, महाबन्धमुद्रा, विपरीतकरणीमुद्रा इत्यादयः।

**बन्धः** — रोगेऽस्मिन् लाभदायकः बन्धोऽस्ति उड्डीयानबन्धः।

**क्रिया** — मधुमेहरोगे लाभदायकषट्कर्माणि यथा – कपालभाति, अग्निसार, नौली, शंखप्रक्षालनम्, वस्त्र धौति, दण्डधौति, कुञ्जलक्रिया, पूर्णशंखप्रक्षालनम्, जलबस्ति इत्यादीनि।

॥ इति ॥